## 3.5. ध्वनि-नियमाः (Phonetic-Laws)

**प्रश्नः 123. ध्वनि-नियमस्य स्वरूपं निरूप्य प्रमुख-ध्वनि-नियमानां नामानि लिखत ।**

उत्तरम्–ध्वनि-नियमाः प्राकृतिक-नियमवत् सार्वभौमाः नहि भवन्ति; अपितु ध्वनि-नियमाः कालसापेक्षाः भवन्ति । प्राकृतिक-नियमस्य अपवादो नैव दृश्यते; किन्तु ध्वनि-नियमस्य तु देश-काल-भाषा-परिस्थितिवशात् अपवादः भवत्येव । कस्मिंश्चित् कालविशेषे दशायां वा जातानि परिवर्तनानि 'ध्वनिनियम'–शब्देन अभिधीयन्ते । इत्थं सुस्पष्टमिदं यत् भाषा-देश-कालेभ्यः सह सम्बद्धत्वात् इमे ध्वनि-नियमाः सीमिताः भवन्ति । अत एव केचन भाषावैज्ञानिकाः ध्वनि-नियमानिमान् ध्वनि-प्रवृत्तिरिति वदन्ति । सत्यं त्विदमस्ति यत् सर्वे ध्वनि-नियमाः आदौ तु प्रवृत्तिस्वरूपाः एव भवन्ति, किन्तु यदा ते पूर्णतां यान्ति, तदा ध्वनिनियमाः इति अभिधीयन्ते ।

ध्वनिनियम-विषये तथ्यमिदं ज्ञातव्यमस्ति यत् कोऽपि ध्वनिनियमः कस्यचन भाषाविशेषस्य कृते भवति; अत एव अन्यस्यां भाषायां तस्य नियमविशेषस्य प्रविष्टिः नैव भवति, अथवा आंशिकरूपेण भवति । अन्यच्च अन्यस्याः भाषायाः गृहीतेषु शब्देषु अन्यस्याः भाषायाः ध्वनिनियमः नहि प्रवर्तते । यथा आंग्लभाषायां गृहीतेषु संस्कृत-शब्देषु ऑंग्लध्वनिनियमः नैव-प्रभवति ।

ध्वनिनियमाः यद्यपि बहवः सन्ति, किन्तु संस्कृत-ध्वनिविषयकाणां नियमानं संख्या मुख्यतया चतस्रः एवास्ति–

(i) ग्रिम-नियमः (Grimm's Law),

(ii) ग्रासमन-नियमः (Grassman's Law),

(iii) वर्नर-नियमः (Verner's Law),

(iv) तालव्य-नियमः (Palatal Law).

**प्रश्नः 124. संक्षेपेण विवेचनीयोऽयं ग्रिमनियमः ।**

उत्तरम्–ग्रिमनियमस्तु ध्वनिनियमस्य सर्वाधिकं प्रसिद्धम् उदाहरणमस्ति । नियमस्यास्य अन्वेषणं यद्यपि रास्क-ईरे-महोदयाभ्यां पूर्वमेव कृतमासीत्; किन्तु जैकब-ग्रिममहोदयेन व्यवस्थितरूपेण सम्पादितोऽयं नियमः ग्रिम-महोदयस्य नाम्ना एव अभिधीयते । ग्रीक-संस्कृत-लैटिन-जर्मनादि-भारोपीयभाषाणां तुलनाप्रसंगे जैकबग्रिममहोदयेन दृष्टमिदं यत् मूलभारोपीय ध्वनयः जर्मनिकशाखायां भिन्न-प्रकारेणैव उपलभ्यन्ते । अतः तेषां ध्वनीनां सूक्ष्म-निरीक्षणं परीक्षणं च कृत्वा ग्रिम-महोदयः नियमशृंखलायां निबद्धमकरोत् । नियमस्यास्य सम्बन्धः द्वाभ्यां परिवर्तनाभ्यां सह वर्तते । इमौ द्वौ ध्वनिनियमौ प्रथमध्वनि-परिवर्तनम्, द्वितीय-ध्वनिपरिवर्तनमिति नामाभ्याम् अभिधीयेते ।

(i) **प्रथम-ध्वनिपरिवर्तनम्**–परिवर्तनमिदं प्रागैतिहासिक-कालिकमस्ति । ग्रिम-महोदयस्यानुसारेण मूलभारोपीय-ध्वनयः संस्कृत-ग्रीक-लैटिनभाषासु सुरक्षिताः सन्ति; किन्तु व्यंजनानि तु संस्कृतभाषायामेव विशुद्धरूपेण उपलभ्यन्ते । एतेषां व्यञ्जनानां परिवर्तितं रूपं जर्मनिकशाखायां उपलभ्यते । ज्ञातव्यमस्ति यत् प्रथमध्वनिपरिवर्तनस्य सम्बन्धः क् त् प्, घ् ध् भ्, ग् द् ब् इति नवभिः स्पर्शव्यञ्जनैः सह वर्तते । अध्ययन-सौकर्यदृष्ट्या नियमस्यास्य सारणीयमत्र प्रस्तूयते–

| मूलभारोपीय-ध्वनयः (संस्कृत-ग्रीक-लैटिनादिः) | जर्मनिक-ध्वनयः (गाथिक-अंग्रेजी-डच-निम्नजर्मनादिः) |
|---|---|
| क् त् प् (अघोषाः अल्प-प्राणाश्च) | ख् थ् फ् (घोषाः महाप्राणाश्च) |
| घ् ध् भ् (घोषाः महाप्राणाश्च) | ग् द् ब् (घोषाः अल्पप्राणाश्च) |
| ग् द् ब् (घोषाः अल्पप्राणाश्च) | क् त् प् (अघोषाः अल्पप्राणाश्च) |

प्रथम-ध्वनिपरिवर्तनमिदम् सूत्ररूपेण अधोलिखितेन रेखा-चित्रेणापि प्रस्तुतमस्ति–




अनेन रेखाचित्रेण सुस्पष्टमिदं यत् मूलभारोपीय-भाषायाः अघोषाल्पप्राण-ध्वनयः जर्मनिकशाखायां घोषमहाप्राणाः अभूवन् । एवमेव घोष-महाप्राणध्वनयः घोषाल्पप्राणाः अभूवन् । परिवर्तनेऽस्मिन् घोषाल्पप्राणध्वनयः अघोषाल्पप्राणाः अभूवन् ।

(ii) **द्वितीय-ध्वनिपरिवर्तनम्**–परिवर्तनमिदं सप्तम-शताब्दी-खीष्टाब्दीयः अस्ति । अनेन परिवर्तनेन निम्नजर्मनवर्गात् उच्चजर्मनवर्गस्य पार्थक्यं प्रदर्शितमस्ति । परिवर्तनेऽस्मिन् ग् द् ब् इत्येषां स्थाने क् त् प्, क् त् प् इत्येषां स्थाने ख् थ् फ्, ख् थ् फ् इत्येषां स्थाने ग् द् ब् इति अभूवन् । अध्ययन-सौकर्यदृष्ट्या सरलीकृतम् इदं तथ्यमधोलिखितेन रेखाचित्रेण–




Scanned with OKEN Scanner

**प्रश्नः 125. ग्रासमन-नियमस्य विवेचनं संक्षेपेण प्रतिपादयत ।**

**उत्तरम्**–ग्रिमाख्यस्य ध्वनिनियमस्य अनेके अपवादाः आसन् । येषां परिमार्जनं ग्रासमनमहोदयेन कृतम् । परिर्माजनोऽयं 'ग्रासमन-नियमः' इत्युच्यते भाषा-वैज्ञानिकैः । नियमेऽस्मिन् ग्रासमनमहोदयेन प्रतिपादितमस्ति यत् द्वौ सन्निकृष्टौ महाप्राणध्वनी (वर्णौ) साकं नहि भवतः, अपितु तयोः द्वयोः वर्णयोः एकः (प्रथमः) अल्पप्राणो भवति । यथा–संस्कृतभाषायां 'धा' धातोः 'धधाति' इति निष्पन्ने पूर्वधकारस्य स्थाने दकारः (अल्पप्राणः) इति जाते 'दधाति' इति निष्पन्नं भवति । एवमेव 'भृ' धातोः 'भिभर्ति' इत्यस्य स्थाने बिभर्ति, 'भभूव' इत्यस्य स्थाने बभूव इत्यादयः भवन्ति ॥

**प्रश्नः 126. वर्नर-नियमस्य संक्षेपेण विवेचना करणीया ।**

**उत्तरम्**–ग्रिम-नियमस्य अपवादपरिमार्जकोऽयं वर्नर-नियमः । यद्यपि ग्रासमनमहोदयेन परिमार्जितोऽयं नियमः, तथापि अवशिष्टानां दोषाणामपवादानां वा उन्मूलनकर्ता तु वर्नरमहोदयः एवास्ति । नियमेऽस्मिन् वर्नर-महोदयेन प्रतिपादितमस्ति यत् यदि 'क् त् प्' इत्येषां वर्णानां पूर्ववर्तिस्वरे बलाघातो भवति तर्हि ग्रिमनियमानुसारेण क् त् प् इत्येतेषु स्थानेषु 'ख् थ् फ्' इति परिवर्तनम् भवत्येव; किन्तु यदा बलाघातः परवर्तिस्वरे भवति, तदा 'क् त् प्' इत्येतेषु वर्णेषु स्थानेषु जर्मनभाषायां 'ग् द् ब्' इति परिवर्तनं भवति । यथा–संस्कृत-भाषायाः युवशस्, शतम्, सप्तन् इत्येतेषु स्थाने गाथिकभाषायां युग्स (Juggs), हुन्द (Hund), सिबुन (Sibun) इति परिवर्तनं भवति । अत्र क्रमशः शकारस्य स्थाने गकारः, तकारस्य स्थाने दकारः तथा पकारस्य स्थाने बकारः इति सञ्जातः । स्वराघातविषयकः नियमोऽयं वर्नर-महोदयस्य प्रज्ञा-प्रकर्षं प्रद्योतयति ॥

## 3.6. अर्थपरिवर्तनस्य दिशः
## (Directions of Sema...

सीमितस्थलेषु वा
शब्दानां व्यापक
पदानां वा मूलार्थ
व्यापकरूपेण प्र
इत्यभिधीयते । य
1. **साहसम्**-
स्तेयम्, लुण्ठनम्
'उत्साहः' इति स्
2. **कर्पटः**–
कर्पटविशेषः अ
सामान्यस्य कृते '
3. **सभ्यः**–'
इत्यस्य व्युत्पत्ति
यस्य कस्यापि स
प्रचलति; अर्थात्
4. **कुशलः**–
'कुशलः' इत्यस्य
ब्रह्मचारी इति अ
चतुरः वाऽस्ति ।
5. **प्रवीणः**-
'प्रवीणः' इत्यस्य
सम्प्रति प्रवीणस्य अ
6. **तैलम्**–'
तिलजन्यमेव स्नेह
सर्वेषामेव पदार्थानां
7. **गवेषणम्**-
सम्बन्धी अन्वेषणम्
सम्प्रति शोधसामान्य

Scanned with OKEN Scanner